CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

श्रीगणेशायनमः॥ ॐ भारतसावित्रीलिख्यते॥व्यासउवाच॥द्वारावत्यांस्थितंकृष्णंचिंतया
मासवेपुराणपांडवानांहितार्थायशीघ्रंकृष्णेनगम्यतांशाश्रीकृष्णःसवेगेनगतोवेह
स्तिनापुरंविदुरोदृष्टवानकृष्णंस्वागतंवोमहाप्रभोशमवदृशेनमात्रेणाकृत्यकृत्योस्मि
सर्वदा॥अद्यमेभगवन्भक्तिःसुदृढदृशेनात्मनः॥२॥अद्यमेसफलंजन्मसुप्रभावं
चजन्मनः॥अद्यमेसफलंज्ञानंजीवितंचसुजीवितं॥३॥अद्यमेपितरस्तुष्टाजोविं
देगृहमागते॥अद्यावमीचनवमीचचतुर्दशीचअद्यायनेचविषुवंचदिनत्रयंच॥
अद्यैवपिंडपित्रयज्ञमखंत्यकालोदामोदरेणासहसागृहमागतेन॥४॥श्रीभगवा
नुवाच॥साधुसाधुमहाप्राज्ञसर्वशास्त्रविशारद॥तृप्तोहंतेवरंब्रूहिददामिकुरुनंदन
॥५॥विदुरउवाच॥आसनंबंधुसंकीर्णंविप्रसंकीर्णमंदिरं॥शयनंसुतसंकीर्णंदेहिमे
मधुसूदन॥६॥कृष्णस्यागमनंश्रुत्वाराजराजासुयोधनः॥विदुरस्यगृहंगत्वा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

इदंवचनमब्रवीत्॥८॥दुर्योधनउवाच॥द्रोणंभीष्मंपरित्यज्यमोहेवंमधुसूदन॥किमर्थंपु
ण्डरीकाक्षसूतंवृषलिभोजनं॥९॥श्रीभगवानुवाच॥शुद्धंभागवतस्यान्नंशुद्धंभागीरथीजलं॥
शुद्धंविष्णुपरंतीर्थंशुद्धमेकादशीव्रतं॥१०॥येशुद्धाभगवद्भक्ताविप्राभागवतास्मृताः॥सर्ववर्णेषुते
शूद्रायेह्यभक्ताजनार्दने॥११॥चंडालमपिमद्भक्तंद्विजंमन्येतसद्बुद्धिमान्॥योनमन्येतमूढात्मासयाति
नरकंध्रुवं॥१२॥कस्यदोषःकुष्ठेनास्तिव्याधिनाकेनपीडितः॥व्यसनंकेननप्राप्तंकस्यसौख्यंनिरंत
रं॥१३॥भोजनंपृच्छसिराजेंद्रआदरंकिन्नपृच्छसि॥भोजनंतुभवेज्जीर्णेआदरस्त्वजरामरः॥१४॥दूषदन्नं
नभोक्तव्यंदूषंतंनैवभोजयेत्॥पांडवान्द्वेषसेराजन्ममप्राणाहिपांडवाः॥१५॥यस्तांद्वेष्टिसमोद्वेष्टि
यस्तानन्वेतिसमान्वेति॥एकस्त्वमागसेराजन्पांडवैर्धर्मचारिभिः॥१६॥प्रीतिभोज्यानिचान्नानिआपद्भो
ज्यानिवापुनः॥चमसेप्रीयसेराजन्नेष्याप्रद्रौपदीवयं॥१७॥आदरादुपनीतानिशाकान्यपिसुयोध
न॥प्रीणंतिमम्भगाज्ञानिनामृतंमानवर्जितं॥१८॥भोजयेनकर्तव्योराजवंधुशतैःसह॥कुर्वंतु
ममवाक्यानिममबोध्यानिबोधयेत्॥१९॥ममवाक्यंकुरुश्रेष्ठसत्यंगच्छसुबोधन॥राज्यंतेनासमं

शाप्ति=शाप्ति=

आगोंपराधस्यमरः=म
आगसेअपराधंकरोषि=म

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

दत्वा यूयं पंचतरं शतं ॥२०॥ वने द्वादशवर्षाणि अज्ञातं त्रयोदशं ॥ पंचग्रामार्थिनो राजन् पांडवाः स
युधिष्ठिरः ॥२१॥ इंद्रप्रस्थं यमप्रस्थं जयंतं वारणावतं ॥ दद्महे चतुरो ग्रामान् पंचमं हस्तिनापुरं ॥२२॥ दु
र्योधन उवाच ॥ इंद्रप्रस्थं ऊषरो दर्तं यमप्रस्थं कृषस्व च ॥ वारणावतं च भीष्मस्य जयंतं सर्वनंदने ॥२३॥
नाग्रामा हि वरस्माकं पंचग्रामान्व्यवस्थिताः ॥ एवं चेद्वस्व्यामान् ऋणद्वै कं नंदन ॥२४॥ सूच्यग्रे
णापि तीक्ष्णेन यावद्भिद्यते मही ॥ तावद्दास्यामि विना युद्धेन केशव ॥२५॥ श्रीभगवानुवाच ॥
यदायदा पश्यसि वानरध्वजं धनुर्धरं पांडुसुतं मदाश्रयं ॥ गदाग्रहस्तं भ्रमितं वृकोदरं ततस्ततस्ते
सिसृजे मेदिनी ॥२६॥ नरे चतुष्कं ऽश्वशतं चषोडशं गजे शतं पंचशतं रथे च ॥ दशोडुनीमुच्चतिबाणवे
र्वृतं ततस्ततस्ते सिसृजे मेदिनी ॥२७॥ धृतराष्ट्र उवाच ॥ ब्रूहि संजय यद्यत्र युद्धे तेषां महात्मनां ॥ पांडवा
नां कुरूणां च संप्रवृत्तं कुलक्षये ॥२८॥ केतत्र प्रथमा योद्धा के चात्र नहारथाः ॥ भीष्मद्रोणौ कर्णमद्रौ कृपश
ल्यौ कथं हतौ ॥२९॥ महाबलाहि केतत्र कथं ते विनिपातिताः ॥ पुत्रस्नेहमम मंदात्मा शृणोति न च दुर्मतिः ॥३०॥
संजय उवाच ॥ मेदिनी भारनिस्तारं पार्थसारथिमुच्यते ॥ प्रणामा मिह वीकेशं दुर्लभं चक्रपाणिनं ॥३१॥ दुर्योध

+ महाबलास्तु केतत्र कथं ते विनिपातिताः ॥ २८ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नःसपुत्रेणद्रोणःसहसूतेनच॥भीष्मोहरिश्मवाश्चैवषडेतेतिरथास्मृताः॥३२॥अहंपुराजनपदस्यामिव
मथामांपरिपृच्छसि॥अर्जुनःसात्यकिश्चैवधृष्टद्युम्नोघटोत्कचः॥३३॥शिखंडीचाभिमन्युश्चवायुपु
त्रस्तथैवच॥नकुलःसहदेवश्चधर्मपुत्रोयुधिष्ठिरः॥३४॥विराटश्चोत्तरश्चैवद्रुपदश्चमहारथः॥पां
डवानांवलेयोद्वौसर्वेविख्युपराक्रमाः॥३५॥कौरवाणांवलेयोद्वौःसर्वेसंकर्षणप्रभाः॥शकुनिःसौब
लोभीष्मःकृतवर्माजयद्रथः॥३६॥हरिश्मवाश्चबाह्लीकोभगदत्तस्तथैवच॥उलूकःसोमदत्तिश्चशरि
विंदुश्चपार्थिवः॥३७॥दुःशासनोविविंशतिश्चित्रश्चराजादुर्योधनस्तथा॥द्वौद्वौगोविकर्णश्चकलिंगश्चतथैव
च॥३८॥एतेहिविंशतिःप्रोक्तामयतेषुमहारथाःबोधनाशस्त्रकुशलाःसर्वेयुद्धविशारदाः॥३९॥आदिसभावन
विराटमथोद्योगंभीष्मपर्वगुरुंरविंजशल्यस्तुवधंमेचा॥ह्रीपर्वशांतिमनुशासनमश्वमेधंव्यासाश्रमंमुशलया
नदिव्यावरोहं॥४०॥आदिपर्वसभापर्वपर्वारण्यकंतथा॥विराटपर्वोद्योगंचभीष्मपर्वततःपरं॥सप्तमंद्रोणपर्वचकर्णपर्वतुचाष्टमं॥९॥नवमंशल्यपर्वचगदापर्वततःपरं॥सौप्तिकंत
तःपर्वयदुवंशस्तथैवच॥४२॥गर्भयात्रास्त्रीपर्वमहाप्रस्थानिकंतथा॥स्वर्गारोहणपर्वहरिवंशस्तथैवच॥इत्यष्टादशपर्वाणिसंख्यारूपायनस्यच॥४४॥भारति

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

लोकेषु= सर्वेषुदेवेषुरतिसर्वत्रजंतुषु॥तरणंसर्वपापानांतस्माद्भारतमुच्यते॥६८॥भारतस्यसमुद्रस्यमेरोर्नारायणस्यच॥अप्रमेया
णिचत्वारिपुण्यतोयमुहागुणाः॥४७॥हेमंतेप्रथमेमासेशुक्लपक्षेत्रयोदशी॥प्रवर्तेभारतंयुद्धंनक्षत्रेयमदैवते॥४८॥
कालयुक्तेनहतोभीष्मःकृष्णपक्षेचसप्तमी॥अस्त्रम्यांचैवसौम्येनद्वम्यांचजयद्रथः॥४९॥द्रोण्योभगदत्तश्चमहायुद्धे
कवचः= पातितः॥एकादश्यांमहाराजेहतोवीरश्चलोमशः॥५०॥ततःप्रभातसमयेविराटद्रुपदोहतौ॥द्वादश्यांचैवसात्यकि
र्ण द्रौणाचार्योहतोरणे॥५१॥त्रयोदश्यांचपूर्वाह्णेवृषसेनोनिपातितः॥तस्मिन्नेवहितेसूर्येवर्तमानेचतुर्दशी॥५२॥निशब्द
तूर्यहतवीर्यशस्त्रप्रणोतदर्पध्वजराजशून्यं॥नशोभतेस्वैरसुतेनहीनंवंदंग्रहाणामिवचंद्रहीनं॥५३॥मुखेकमलपत्रा
संयथाऽक्षवराववर्जितं॥तथातत्कौरवसैन्यंकर्णहीनंनशोभते॥५४॥अमावास्योहतःशल्योमद्रराजोमहाबलः॥अमावा
स्यांमध्यभागेराजाद्यौधनोहतः॥५५॥धृतराष्ट्रउवाच॥गदयापातयामासभीमसेनोनिमर्षणः॥कथंदुर्योधनोरा
जाभीमसेनेननिपातितः॥५६॥संजयउवाच॥अन्यथाभाषितंयुद्धंछद्मनाहतमन्यथा॥अक्षौहण्यसहस्राणिनवदं
तिशतानिच॥५७॥राजपुत्रसहस्राणिहतानीष्मेणनिवर्तितः॥शतद्युम्नोशिखंडीचद्रोपद्याःपंचचात्मजाः॥५८॥एव
मष्टादशेहतिभूक्षौहिण्यंदिनेदिने॥दिनानिदशभीष्मेणभारद्वाजेनपंचच॥५९॥हतद्यंतुकर्णेनशल्येनाहवदि
नंतथा॥गदयाद्युद्धदिनाहतुएतद्भारतमुच्यते॥६०॥नवाग्रहस्त्रिनागेनाग्नेशतंरथाःशरैर्वेशतंचाश्वाःप्रभुमश्वे
शतंनरः॥६१॥सर्वेक्षेत्रेमहाक्षेत्रेकुरुक्षेत्रेमहाबलः॥पार्थानांरोहयेत्स्वर्गं राजपुत्रान्यशस्विनः॥६२॥रणयज्ञेषुयज्ञेन

+=यशस्विनइत्यपिपाठः+॥१॥द्रौपदीच=१॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रीसितेनयुधिष्ठिरः॥वेदींकृत्वाकुरुक्षेत्रंयूपंकृत्वाजनार्दनं॥६३॥पंचाशीमरणिंकृत्वावह्निंकृत्वाक्कोदरं॥
इध्मंधनंपशुंकृत्वाकरांकृत्वासहाहविः॥६४॥होतारमर्जुनंकृत्वायजमानोयुधिष्ठिरः॥६५॥गांडीवेनस्रुवेणो
वह्यमानेषुराजसु॥६५॥आयज्ञिकमिदंद्रव्यंब्रह्मणेकोद्रवेच्युतः॥यज्ञेनानेनदेवेशंसप्रीतस्तुजनार्द
नः॥६६॥इमांभारतसावित्रींप्रातरुत्थाययःपठेत्॥दिवावायदिवारात्रौशमेषुविशमेषुच॥६७॥नभय
विद्यतेकिंचित्कार्यसिद्धिमवाप्नुयात्॥अहोरात्रकृतंपापंपठमानेविनश्यति॥६८॥संवत्सरकृतंपापं पापं
नेविनश्यति॥यत्कृतंगोसहस्रेषुदीयमानेषुयत्कृतं॥६९॥प्राप्नोतिपठनादेवव्यासस्यवचनंयथा॥
यत्रयोगेश्वरेकृष्णोयत्रपार्थोधनुर्धरः॥तत्रश्रीर्विजयोभूतिर्ध्रुवानीतिर्मतिर्मम॥७०॥इतिश्री
वेदव्यासविरचितंश्रीभारतसावित्रीस्तोत्रंसंपूर्णमिदमस्तु॥

॥७०००॥नवहजारहाथी॥ ७०००० नवलाख

७०००००० नवकोटयः॥७००००००० नवसै करोड़

Kashi Maharani Collection, Ramnagar Fort, Varanasi